अद्वैतवादखण्डन-
परिशिष्टम्

महामहोपाध्याय

श्रीयुक्तराखालदासन्यायरत्नभट्टाचार्य्येण

विरचितम्

Published By Shri Shankar Tarkaratna,
Panchanana Tarkabagish, Dakshina
Charan Tarkanidhi and
Harihara Bhattacharya.

Printed by A. K. Mukherji at the
MAHALAKSHMI PRESS,
BENARES CITY.

अद्वैतवादखण्डन-

परिशिष्टम्

महामहोपाध्याय

श्रीयुक्तराखालदासन्यायरत्नभट्टाचार्य्येण

विरचितम्

श्रीश्रीशङ्करतर्करत्नेन श्रीपञ्चाननतर्कवागीशेन

श्रीदक्षिणाचरणतर्कनिधिना

श्रीहरिहरभट्टाचार्य्येण च

प्रकाशितम्

वाराणस्यां

महालक्ष्मीयन्त्रे श्रीअक्षयकुमारमुखोपाध्यायेन

मुद्रितम्

खी० १९०९

मूल्यमानकषट्कम्

श्रीदुर्गा—

शरणम् ।

अद्वैतवादखण्डनपरिशिष्टम् ।

उमायुक्तानुमाकारः प्राचीनोक्तो विचार्य्यते ।
अद्वैतसिद्धये भ्रान्तिर्भ्रान्तिमूलैव दर्श्यते ॥

श्रीहर्षप्रणीत-खण्डनग्रन्थ--व्याख्याकृतातिप्राचीन--सुप्रसिद्ध-विद्यासागर-महामहोपाध्यायेन खण्डनकृन्मङ्गलाचरणपद्यस्थिता-नुमयेत्यंशलब्ध-भगवदनुमानस्याकारबोधक--वाक्यं प्रदर्शितं । तादृशवाक्यतात्पर्य्यविषयार्थमिदानीं वहवो न विज्ञातुं प्रभवन्ति । केचिद्वा तद्वाक्यस्य निर्द्दोषतां न स्वीकुर्व्वन्ति । अतः पण्डितमण्डलीं तद्वाक्यार्थं निर्द्दोषतया सुव्यक्तं बोधयितुं ममैष प्रयासः । सम्भावयामि सहृदयमहोदयगणः स्वगुणेन मत्प्रणीत-सन्दर्भस्य सर्व्वांशं समालोच्य मम श्रमं सफलं कर्त्तुं कामयिष्यति । एकः प्राचीनश्लोकः स्मृतिपथमारोहति,—

गुणायन्ते दोषाः सुजनवदने दुर्ज्जनमुखे
गुणा दोषायन्ते न खलु तदिदं विस्मयपदम् ।

यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति च गरं दुःसहतरम् ॥

बहवः सन्ति वेदान्तवाक्यानां पाठपाटवाः ।
तद्वाक्यप्रकृतार्थस्य ज्ञानवांस्तु सुदुर्लभः ॥
एतद्ग्रन्थस्य सर्व्वांशदर्शिनां दूरदर्शिनां ।
दोषोक्तिरथवा तोषः स्यान्ममासीमतोषकृत् ॥

विद्यासागरदर्शितानुमानाकारस्तु—इयं पृथिवी सकर्तृकाकर्तृकवृत्तित्वरहितानेकाकर्तृकवृत्तित्वरहितानेकतन्निष्ठाधिकरणं, प्रमेयत्वात् इति । सकर्तृकादि-अधिकरणमितप्रन्त-वाक्यतः साध्यत्रयबोधः खण्डनटीकाकृदभिप्रेतः । तत्रैकं साध्यं सकर्तृकाकर्तृकवृत्तित्वरहितेत्यंशतः प्राप्तं, द्वितीयतृतीयसाध्यबोधकवाक्यंतु द्वन्द्वगर्भसप्तमीतत्पुरुषघटितकर्म्मधारयनिष्पन्नं । विग्रहत्रयंच—अनेके च तच्चेति द्वन्द्वविग्रहः, तत्र निष्ठमिति तत्पुरुषविग्रहः, अनेकाकर्तृकवृत्तित्वरहितं च तत् अनेकतन्निष्ठं चेतीतिकर्म्मधारयविग्रहः । वाक्यस्थिततत्पदमव्ययं नतु सर्व्वनाम, तथासति अनेकपदलोपेन तत्पदस्यैवैकशेषत्वापत्तिः । किंच, प्रयोजनविशेषस्य सुस्पष्टप्रतिपादनार्थं सर्व्वनामपदस्य नैकशेषत्वमतो दर्शितवाक्यस्थतत्पदस्य सर्व्वनामत्वेऽपि स्वस्वप्रतियोगिसामानाधिकरण्येतिजगदीशप्रभृतिग्रन्थकृल्लिखनं नासङ्गतम् । एवं यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया इति दीधितिकारप्रयुक्तवाक्यमध्ये तत्तदितिप्रयोगोऽपि ।

अथवा, अनेकपदस्य बहुव्रीहित्वस्वीकारेण तत एव अनेकनि-ष्ठरूपसाध्यलाभसम्भवेन तद्‌वाक्यघटक-श्रुत-निष्ठपदार्थे तस्यानन्व-येऽपि न साध्यालाभः । बहुव्रीहिविग्रहस्तु एकमात्रं न यस्येत्या-कारः, यस्येत्यत्र षष्ठ्यर्थोऽधिकरणत्वं, अधिकरणत्वार्थे षष्ठीप्रयोगो न दृष्टचर इति नाशङ्क्यं, यतस्तद्विशिष्टस्येतिदीधितिकारपंक्तिस्थ-षष्ठीविभक्तेरधिकरणत्वार्थकत्वं सिद्धान्तलक्षणविचारे जगदीशेन स्वहस्तितम् । अनारूढवानरो वृक्षः, अनारूढसर्व्वजीवं तत्पीठ-मित्यादिस्थलीय-बहुव्रीहेर्विग्रहवाक्यस्थ-द्वितीयार्थकर्म्मत्वस्याभाव-बोधे व्युत्पन्नत्ववत् अनेके इतिबहुव्रीहेरपि विग्रहवाक्यस्थषष्ठ्य-र्थाधिकरणत्वरूपसम्बन्धस्याभावबोधे व्युत्पत्तिः सर्व्वसम्मता ॥

इयं पृथिवीतिवाक्यं पक्षतात्पर्य्यकं । द्वन्द्वविग्रहस्थित-प्रथम-वाक्यस्यार्थः—कृतिमज्जन्ये तदजन्येचोभयत्रवृत्तित्वरहितरूपं साध्यं, एवंभूतसाध्यान्तर्गतं सकर्त्तृकत्वं जन्यत्वाभावादिकंच । दृष्टान्ता घटगगणादयः सर्व्वे एव । न्यायमते क्षितिः सकर्त्तृका कार्य्यत्वात् इत्येवानुमानाकारस्तत्र तु दृष्टान्तं जन्यमात्रं न तु नित्यमपि । एवं च नैयायिकप्रदर्शितानुमानापेक्षया सुष्ठुतरमीदृश्या-नुमानाकारप्रदर्शनं, नित्यानित्यसकलपदार्थमादायैव दृष्टान्त-दृष्टेः ।

ईदृशसाध्ये साधनीये साध्यान्तर्गताजन्यत्वस्यास्मदादिकर्त्तृ-त्वस्य च तत्र बाधेन साध्यान्तर्गततया यत् सिध्येत् तदेवाक्रमभग-वन्निष्ठकर्त्तृताकत्वरूपपदार्थान्तरम् । अत्र कल्पे एतत्पृथिवीगत-तद्व्यक्तित्वादेरपि साध्यान्तर्गततया प्राप्तत्वेन तस्य च मतद्वय-एव क्लृप्तत्वेन सिद्धसाधनमित्यपरितोषेण कल्पान्तरमादृतम् । क-ल्पान्तरीय-प्रथमसाध्यं, अनेकाकर्त्तृकवृत्तित्वरहितानेकेत्य-

न्तेन लब्धं, साध्ये अनेकाकर्त्तृकवृत्तित्वराहित्यविशेषणन्तु पक्षीभूततत्पृथिव्यां सकर्त्तृकत्वसिद्धिप्रयोजनकं । विशिष्यांशानुपादाने पक्षगततद्व्यक्तित्वरूपसाध्यघटकपदार्थमादाय सिद्धसाधनं । एवं च ईदृशानुमानात् साध्यतावच्छेदकरूपेण तत्पृथिवीगगणादिरूपनित्यव्यक्त्यन्यतरत्वस्यैव पक्षे अनुमितिविषयतया तत्पृथिव्यां सुतरां सकर्त्तृकत्वसिद्धिपर्य्यवसानम् । तादृशानुमितिश्च अकर्त्तृकद्वयवृत्तिज्ञानं प्रतिरोधिनी, अतस्तत्र अकर्त्तृकत्वशङ्का कथमपि न भवितुं प्रभवेत् । तत्पृथिव्यामकर्त्तृकत्वपक्षावलम्बिमते प्रकृतसाध्यतावच्छेदकरूपेण पक्षघटान्यतरत्वस्यापि तादृशानुमानविषयतया प्राप्तत्वेन तत्राकर्त्तृकत्ववादिनामपीष्टसिद्धि रित्यस्वरसात् कल्पान्तर माह तदित्यादिना ।

तृतीयकल्पीयसाध्यं तु अकर्त्तृकद्वयावृत्तित्वेसति तन्निष्ठं अर्थात् अकर्त्तृकनिष्ठं प्रागभावप्रतियोगिनिष्ठमिति यावत्, न तु नित्यवृत्तिधर्म्मी स्तथासति प्रागभावे व्यभिचारः स्यात्, न च कालिकसम्बन्धेनैव प्रमेयत्वस्य हेतुत्वं तस्याभिप्रेतमिति वाच्यं तथासति उदयनाचार्य्यप्रभृतिग्रन्थकारप्रदर्शितहेतूपेक्षाया निर्व्वीजतापत्तेः । न च कार्य्यत्वरूपहेतुः कथमुपेक्षितः, कथंवा पक्षे सकर्त्तृकत्वसाधनार्थं दर्शितकुसृष्टिकल्पनया साध्यप्रयोगोऽर्थापत्तितः, साध्यसिद्धिप्रयासश्च कृतः । अनायासबोधगम्यार्थकस्य क्षितिः सकर्त्तृका कार्य्यत्वात् इत्याकारस्यानुमानपरवाक्यस्यैव प्रयोक्तुं युक्तत्वात्, यत ईदृशवाक्यलब्धानुमानत आहत्यैव साध्यसिद्धिः सम्भवति इति वाच्यं दर्शितप्रयासप्रयोजनस्याग्रे दर्शयितव्यत्वात् ।

. . . .

अथ परमेश्वरसिद्धये तार्किकाणां वह्वाडम्बरो दृश्यते स च

कथं, परमवाक्यसाम्नाज्यादेव परमेश्वरस्यावधारितत्वात्, सिद्धिसत्त्वेनानुमित्यसंभवाच्च । तद्वाक्यानि यथा--कर्त्ता कारयिता शम्भुरिति स्कान्दं, कर्त्तारमपि मां विद्धीति भगवद्गीतावाक्यं विश्वस्य कर्त्ता भुवनस्य गोप्ता, ऐतदात्म्यमिदं सर्व्वमित्याद्युपनिषदन्तरीयं च । न च आत्मा वारे श्रोतव्यो मन्तव्य इति श्रुति वाक्येन श्रवणानन्तरं मननस्य निःश्रेयसोपायत्वेन विहिततया मुमुक्षोस्तदावश्यकत्वमतः सिद्धिसत्त्वेऽपि सिषाधयिषया भगवदनुमित्यर्थं तार्किकाणामायासः सफल एवेति वाच्यं सिद्धस्यानुमित्यर्थं दर्शितानुमानाड़म्बरवैफल्यापत्तेः, ईश्वरो जगत्कर्त्ता ईश्वरत्वात् जगदीश्वरकर्त्तृकमीश्वरकर्त्तृकत्वादित्याकारप्रदर्शनेनैव कृतकृत्यतासम्भवात्; इति चेन्न, मामकर्त्तारमव्ययमितिगीतावाक्येन भगवत्यकर्त्तृकत्वस्यापि प्राप्ततया निर्गुणं परमं ब्रह्मेत्यादिवाक्यैस्तस्य निर्गुणत्वप्राप्त्या गुणान्तर्गतायाः कृतेरप्यभावस्य सुतरां प्राप्तत्वेन संशयस्यावश्यकतया तन्निवृत्त्यर्थं दर्शितानुमानप्रयत्नस्यावश्यकत्वात् ।

अतएव अथेतिब्रह्मजिज्ञासेति व्याससूत्रोपपत्तिरपि; उपनिषद्वाक्यतो महर्षीणां जगत्कर्त्तृत्वादिप्रकारेण पूर्व्वकाल एव ब्रह्मावधारणं चेत्तज्जिज्ञासैव नोदेतुमर्हति, विषयसिद्धे रिच्छां प्रति विरोधित्वात्; एवं च तत्सूत्रप्रणयनमुन्मत्तप्रलपितं स्यात् । उपनिषद्वाक्यमात्रेण ब्रह्मतत्त्वावधारणं कस्यापि न भवितुमर्हतीति महर्षिवेदव्यासवाक्यतोऽपि सुस्पष्टमवगम्यते । तद् यथा—तत्रोपनिषदं तात परिशेषं तु पार्थिव । मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं परां ॥ आन्वीक्षिकी तर्कविद्या । आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोरितिकोषसत्त्वात् । तत्रैव परत्वरूपविशे-

षणं प्रदर्श्य उपनिषदादिसर्व्वशास्त्रापेक्षया तर्कशास्त्रस्य प्राधान्यं सूचितम् ।

एवमर्थवादात्मकानां वेदवाक्यानामप्यप्रामाण्यस्वीकृतामाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामितिसूत्रकृन्महर्षिजैमिनिमतानुसारिणां मीमांसकगुरुप्रभृतीनामर्थवादमात्रबोधितपरमेश्वरेऽपि न प्रामाणिकत्वं । कार्य्यान्वितस्वार्थे पदानां शक्तिरिति तेषां सिद्धान्तः, अतो यद्वाक्यजन्यशाब्दबोधे नियमतः कार्य्यत्वं भासते तान्येव वाक्यानि तन्मते प्रमाणानि; नत्वपरवाक्यसहस्रमपि । एवं च ब्रह्मबोधकोपनिषद्वाक्यानि विधिप्रत्ययशून्यतया न प्रामाणानि, परन्तु स्तुत्यादिवाक्यवत् कथंचिन्मानसबोधपराण्येव; तादृशमानसान्याहार्य्याणि वानाहार्य्याणि इति संशयो जागर्त्ति, सुतरां तत्तद्वाक्यान्नेश्वरसिद्धिः । अनाहार्य्यबोधविषयताया एव पारमार्थिकतासाधकत्वात् । अतस्तन्मते जगत्कर्त्तृताया धर्म्मिण्यपि विवादो दुष्परिहर एवेति । नचात्मा वारे श्रोतव्यो मन्तव्यः, मन्तव्यश्चोपपत्तिभिरित्यादिविधिप्रत्ययघटितवाक्यसत्त्वेनात्मनः प्रामाणिकत्वं सूपपन्नमिति वाच्यं, तत्रात्मपदस्यजीवात्मपरतयैव उपपत्तिसम्भवात् । देहादिभिन्नत्वप्रकारेण जीवतत्त्वज्ञानस्यैव मुक्त्यावासन्नोपायतया गौतमकणादप्रभृतिमहर्षिणावधारितत्वात् । निरीश्वरवादिमीमांसकानामपि तस्य सुतरां तदर्थपरत्वैव । तत्रात्मपदस्य जीवपरतया व्याख्यानं मुक्तिवादे सर्व्वप्रसिद्धनिबन्धकृद्गदाधरेणापि स्वहस्तितम् । अतो निरीश्वरवादिमतनिराकरणाय भवत्येवार्थवान् कर्त्तृत्वेनभगवत्सिद्धिप्रयासः । अनुमानात् पूर्व्वं श्रवणेन

ईश्वरस्वरूपतत्त्वप्रकारेण ज्ञानं नहि सम्भवतीत्युपनिषदप्याह—नायमात्मा प्रवचनेन इत्यादि ।

आत्मा वारे श्रोतव्य इत्यादिवाक्येन परमात्मैव प्रतिपाद्यते इत्युदयनाचार्य्यमतमित्यवधार्य्यते, श्रुतो हि भगवानित्यादितल्लिखनस्य कार्य्यायोजनधृत्यादेरितितत्कृतकारिकायाश्च दर्शनात् । अथ श्रवणोत्तरं मननस्य कैवल्योपयोगितया शास्त्रनिर्द्दिष्टत्वेपि भवतु तन्मते शाब्दसिद्धगुत्तरं सिषाधयिषयानुमाने प्रवृत्तिः, तावता कथमनुमानाडम्बरः प्रदर्शितस्तेन । ईश्वरो जगत्कर्त्ता ईश्वरत्वादित्याद्यनुमानेनैवेष्टसिद्धिसम्भवात् इति चेन्न यतो विरुद्धधर्म्मप्रकारेण परमेश्वरबोधकानि श्रुतिवाक्यानि श्रुतवतां विरुद्धविविधधर्म्मप्रकारेणैव शाब्दानां जातत्वेनैकस्मिन्नपि प्रमात्वावधारणं भवितुं नार्हति । अतस्तादृश विषयतया नेश्वरसिद्धिः सम्भवेत्, प्रमात्वेनावधारितस्य अप्रामाण्यज्ञानानास्कन्दितस्य वा निश्चयस्य विषयतयैव पदार्थसिद्धेः सर्व्वसम्मतत्वात् । एवं च प्रकृततत्त्वेन भगवत्सिद्ध्यर्थं तर्कशोधितानुमानरूपयुक्त्यनुसन्धानप्रयत्नो जातस्तादृशानुमानज निश्चयेत्वप्रामाण्यज्ञानं कथमपि न भवितुमर्हति, सुतरां तद्विषयतयैव ईश्वरसिद्धौ न विवादलेशोपि । एतदेवोक्तमुदयनाचार्य्येण यावदुक्तोपपन्न इति नैयायिका इति । अस्य भावार्थः—यावदुक्तेषु अर्थात् श्रौतेषु यावत्सु मध्ये य उपपन्न अर्थात् युक्त्यावधारितः स ईश्वरः । एवं च ब्रह्म बोधकसकलवाक्यानां कस्यचित् लक्षणासाहाय्येन कस्यचित् शक्त्या अनुमानसिद्धमेवार्थमवधार्य्य वेदस्याप्रामाण्यशङ्कापनोदनीया ॥

अथानुमानतो जगत्कर्त्तृत्वेन तत्सिद्धौ मामकर्त्तारमव्ययमितिगीतांशस्य का गतिरिति चेन्न शब्दानुमानरूपप्रमाणद्वयेन

भगवति कर्त्तृत्वसिद्धौ तत्राकर्त्तृत्वबोधकवाक्यस्य स्वघटकपदशक्तिलभ्यार्थं परित्यज्य लक्षणावलम्बनेन बोधकताया एव सर्व्वमीमांसकसम्मतत्वात् । अर्थवादस्थले लक्षणास्वीकारः सर्व्वसम्मत एव, अन्यथायुर्घृतं घृतममृतमित्याद्यसंख्यवाक्यानामगतिः स्यात् । विशुद्धब्रह्मण्यकर्त्तृत्वं ईश्वरभावापन्ने तस्मिंस्तु कर्त्तृत्वमितयद्वैतवादिव्यवस्था न साधीयसी, प्रयोक्तृशरीरावच्छिन्नशक्त्यास्मत्पदमहिम्ना तादृशोपाध्यवच्छिन्न एव परमात्मनि कर्त्तृत्वाभावप्रतिपादनावश्यकत्वात्, अतएव द्वितीयक्षणावच्छिन्नघटो न रूपवानित्यादिको न प्रयोगः । एवं च मामकर्त्तारमव्ययमित्यत्र कृधातोर्जन्यकृतौ लाक्षणिकत्वमुपगम्य विरोधो वार्य्यते, भगवत्कृतेर्नित्यत्वात् । निर्गुणं परमं ब्रह्म इत्यत्र गुणशब्दोपि वहिरिन्द्रियग्राह्यजातीयविशेषगुणेषु लाक्षणिकः उपनिषदन्तरेण भगवति तादृशगुणशून्यताया एव सुस्पष्टं प्रतिपादितत्वात् । तद्यथा--अशब्दमस्पर्शमरूपमव्ययमित्यादि । न च निर्गुणमित्यत्रगुणपदं दर्शितविशेषधर्म्माश्रये लाक्षणिकमथवा शब्दादिपदं गुणत्वरूपसामान्यधर्म्मावच्छिन्ने इत्यत्र को विनिगमक इति वाच्यमशब्दमस्पर्शमरूपमितिपदत्रयप्रयोगसार्थक्याय तेष्वेकतरपदे गुणत्वावच्छिन्नलाक्षणिकताया असम्भवात, अतएव ब्रह्मणि कृतिज्ञानवत्त्वबोधकानि कर्त्तारमपि मां विद्धि, विश्वस्यकर्त्ता भुवनस्य गोप्ता, यतो वै इमानि भूतानि जायन्ते, अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः ज्ञोऽतएवेति ब्रह्मसूत्रद्वयं, यः सर्व्वज्ञः सर्व्वविदित्यादिमहावाक्यानि सुष्ठु संगच्छन्ते । परमेश्वरे मनोमात्रग्राह्यजातीयानां कृतिज्ञानेच्छानां सत्त्वेऽपि वहिरिन्द्रियग्राह्यजातीयानां परिमाणसंख्यासंयोगादिरूपसामान्यगुणस्य सत्त्वेऽ-

पि च यथाविवक्षितार्थकनिर्गुणमितिवाक्यार्थो भगवत्यबाधित एवेति ध्येयं। तत्राद्दष्टशून्यत्वं तु गीतोपनिषद्वाक्येन प्राप्तं, गीता यथा--न मां कर्म्माणि लिम्पन्ति इति, ईद्दशाभावकूटवत्त्वस्य दिक्कालयो र्धर्म्मत्वेऽपि न क्षतिर्दिक्कालयोरीश्वरानतिरिक्ततायाः परमवाक्यतः दीधितिकारव्यवस्थातस्त्वावगमात्। परमवाक्यं यथा—कालस्वरूपं रूपं तद्विष्णो र्मैत्रेय वर्त्तते, स च कालः सनातन इत्यादि।

अथ श्रुतिस्थितात्मपदस्य जीवात्मपरत्वे तत्सिद्धयर्थं श्रुतिवाक्यस्य क उपयोगस्तस्याहंप्रत्ययविषयत्वेनैवसिद्धत्वात् इति चेन्न जीविनामहं सुन्दर इत्याकारकप्रत्यक्षस्यैवौत्सर्गिकत्वेन शरीरेष्वात्मावधारणं सर्वेषामेव संसारिणामतस्तदवधारणाय देहान्ते कैवल्यलाभकामना न सम्भवेदिति जीवानां देहभिन्नताया देहविनाशेऽपि देहस्थायिताया(श्च) सिद्धयर्थं श्रुतिवाक्यानामुपयोगात्। श्रुतिर्यथा--स्वर्गकामोऽश्वमेधेन यजेत, मोक्षकामोऽर्च्चयेद्धरिमित्यादिलिङ्समभिव्याहृतवाक्यम्, एवंच श्रुतिवाक्यतो जीवानां स्थायित्वस्य सिद्धत्वेन देहभिन्नत्वज्ञानरूपजीवतत्त्वज्ञानजननसम्भवेऽपि तत्तज्जीवभिन्ना यावन्तः पदार्था जगति वर्त्तन्ते तत्तत्प्रत्येकपदार्थाभिन्नत्वज्ञानं तन्न तन्नेत्याकारकमेव कैवल्योपयोगि भवेदतः सकलपदार्थतत्त्वज्ञानं मुमुक्षोरावश्यकं तदुपपत्तये गौतमकणादग्रन्थः प्रवृत्तः। परमेश्वरस्वीकर्तॄणामास्तिकानां जीवे परमेश्वरभिन्नत्वरूपजीवतत्त्वज्ञानस्यापि दर्शिततन्नतन्नेतरादिज्ञानान्तर्भूततया प्रतियोगिज्ञानस्याभावधीहेतुतयाच प्रागुक्तानुमानत ईश्वरसिद्धिप्रयासस्यापि साफल्यात्, आत्मावारे इतिबोधितानुमानन्तु तन्नतन्नेत्याकारकपर्य्यवसायीतरभेदानुमानमेव। एवंच सर्व्वं खल्विदं ब्रह्मेत्यादिवाक्यस्य-

सर्व्वपदं आयुर्घृतमितिवाक्यस्थायुःपदवत् जगज्जनकलाघविकमेव दर्शितानुमानत ऐतदात्म्यमिदं सर्व्वं, विश्वस्य कर्त्ता, जन्माद्यस्य यत इत्यादिबहुवाक्यतश्च सर्व्वजनकताया एव प्रतिपन्नत्वात् ।

प्रकृतमनुसरामः, अथ क्षितिः सकर्त्तृका कार्य्यत्वादित्यादि-रूपमुदयनाचार्य्यप्रभृतिभिः प्रदर्शितमनुमानाकारमुपेक्ष्य अर्थापत्त्या तत्र तत्र सकर्त्तृकत्वसाधनार्थं दुर्व्वोध्यार्थकानुमानाकारः कथं विद्यासागरेण प्रदर्शितः । नचेदृशानुमाने सर्व्वत्रैव सहचारदर्शन-जं व्याप्तिज्ञानं भवेत्, कार्य्यत्वरूपहेतुपक्षे तु न तथेत्येतन्मतस्योत्-कर्ष इति वाच्यं यतो सहचारदर्शनं हि हेत्वधिकरणे व्यभिचार-शङ्कानिवर्त्तनद्वारा व्याप्तिनिश्चयोपयोगि भवेत् । एवंच स्वल्पस्थान-वृत्तिहेतुस्थले तादृशस्वल्पस्थल एव सहचारदर्शनं व्याप्तिनिश्चयो-पयोगि । अधिकस्थलवृत्तिहेतौ चाधिकस्थल एवेति । एतावताधि-कस्थले सहचारदर्शनस्य क उत्कर्ष इति चेन्न वेदनित्यतावादि मी-मांसकमतस्य च्छलतः खण्डनार्थं तार्किकमतखण्डनाय गगणे पर-माणुषु च सकर्त्तृकत्वसाधनार्थंच दर्शितानुमानप्रवृत्तेः, कार्य्यत्व-हेतुना शब्दादौ कृतिमज्जन्यत्वव्यवस्थापनं न भवितुमर्हति हेतो-स्त्वासत्वात्; तथा च जितमद्वैतवादिभिरिति । अत्र सूक्ष्ममोच्य-ते, ध्वंसप्रागभावाकल्पनाकृतलाघवज्ञानरूपतर्कसहकृतजन्यत्ववि-रोध्यनुमानस्यैव सत्वेन गगणे परमाणुषु च सकर्त्तृकत्वानुमिति र्न सम्भवति । अनुमानं यथा--गगणमजन्यं निरवयवद्रव्यत्वात्, दृष्टा-न्ताः परमेश्वरादयः । अथवा, गगणं द्रव्यवृत्तिजन्यत्वाभाववत्-निरवयवत्वात्, गगणस्य नित्यत्वे लाघवं जन्यत्वे तद्ध्वंसप्रागभाव-तत्प्रागभावध्वंसादिकल्पनप्रयुक्तमहागौरवापत्तिरितितर्कसहिता-नुमानात् गगणादौ नित्यत्वसिद्धिः । एतेन परमाणवोऽपि व्या-

ख्याता: । तस्य नित्यत्वसाधकमहावाक्यान्यपि यथा,—आकाशव-
त् सर्व्वगतश्च नित्य:, यथा सर्व्वगत: सौक्ष्म्यादाकाशो नोपलिप्यते,
यथा सर्व्वगमाकाशमित्यादि; एतादृशपरमवाक्यनिकरतो दर्शि-
ततर्कसहितानुमानतश्च गगणादेर्नित्यत्वसिद्धे: कथमपि खण्डयि-
तुमशक्यत्वात् । एवंच द्विविधप्रमाणेन गगणस्य नित्यत्वसिद्धा
एकमात्रशब्दप्रमाणस्य यथाश्रुतार्थकत्वरक्षार्थं तस्य जन्यत्वस्वीकार
उपहासास्पदमेव । अर्थवादात्मके कस्मिन्नपि परमवाक्ये किं ला-
क्षणिकत्वं नास्ति । अतएव तस्मादाकाशः सम्भूत इत्यादावाका-
शपदं इन्द्रियविशेषे लाक्षणिकमथवाकाशपदशक्यतावच्छेदकेषु
शब्देष्वेव महाकविरित्यादौ कवित्वांशे महत्त्वान्वयवत् व्युत्पत्ति-
वैचित्र्येन जन्यत्वान्वयं स्वीकृत्य तद्वाक्यमुपपादनीयम् । एवं री-
त्यैवाहं वहु स्यां प्रजायेय, तदात्मानं सृजाम्यहमित्यादिवाक्यान्यु-
पपादनीयानि । प्रजायेयेत्यत्र जनधातुना पूर्व्वशरीरपरिग्रहः
प्रत्याय्यते, आद्यक्षणसम्बन्धस्यैव तस्मिन्नपि जनेरर्थताया गदाधरा-
दिग्रन्थकारै: स्वहस्तितत्वात् । भूधातुरसधातुश्च क्वचिज्जनधातु-
समानार्थकोऽपि । सृजधातोरर्थस्तु तादृशजन्यप्रयोजकप्रयत्नोऽपि,
कृञ्धातुश्च सृजधातुसमानार्थक एव, नतु प्रयत्नमात्रं तथासति यत-
धातोरपि सकर्म्मकतापत्ते रिति तु केषाञ्चिन्मतम् । आकाशस्य-
जन्यत्वे तस्य सर्व्वगतत्वहान्यापत्ति:, स्वस्मिन् स्वप्रागभाववत्
कालमात्रवृत्तिसम्बन्धत्वस्य कस्मिन्नप्यसत्त्वात् ।

इदन्त्ववधातव्यं विद्यासागरोक्तानुमानमप्रयोजकं तत्पृथि-
व्यामकर्त्तृकत्वानुमानमपि सम्भवति, तद्यथा--सकर्त्तृकत्वाभा-
वातिरिक्ता ये ये तत्पृथिवीवृत्तिधर्म्मास्तदतिरिक्तधर्म्मवान् प्रमेय-
त्वात् इति, तर्कराहित्यन्तु मतद्वय एव समानं । अतः क्षितिः सक-

त्तृ्कं कार्य्यत्वात् इत्युदयनाचार्य्यप्रभृतिप्रदर्शितानुमानाकार एव समीचीनः । अत्रास्ति सत्तर्को, नास्ति च सत्प्रतिपक्षादिरूप-दोषः । एतत्पारिपाट्यं कुसुमाञ्जलिग्रन्थे द्रष्टव्यं, ग्रन्थगौरव-भयेनात्र तन्न लिखितमित्यास्तां विस्तरः ॥

एतेन दर्शितानुमानमहावाक्यतः खण्डित एवाद्वैतवादिनां मायादौ भगवदुपादानकत्वसिद्धान्तः । इदानीं जीवब्रह्माभेदं च तत्सिद्धान्तितं खण्डयितुं विचारो दर्श्यते,—

अद्वैतवादिनस्तु छान्दोग्योपनिषत्स्थिततत्त्वमसि श्वेतकेतो इति वाक्यदर्शनेन जीवब्रह्मणोरभेदज्ञानस्यापि मुक्तावुपयोगित्वं स्वीकृतवन्तः । ते तु तद्वचनतात्पर्य्यार्थं विज्ञातुं न प्राभवन् । यतस्त-द्वाक्यस्थतत्पदं न परमेश्वरबोधकसर्व्वनामात्मकं, तथासति पूर्व्वपठित स आत्मा इतिवाक्यस्थतत्पदवत्, सा काष्ठा सा परागति रित्युपनिषदन्तरस्थिततत्पदवच्च पुंलिङ्गयुस्मदर्थविशेष-णपरतत्पदस्य पुंलिङ्गतावश्यकत्वेन स इति प्रयोगापत्तेः । त-दादिसर्व्वनाम्ना विशेष्यलिङ्गवचनराहित्यस्य लौकिकवाक्ये वैदिकवाक्यादौ च कुत्राप्यदृष्टत्वात् । तस्मात् अश्वति श्वनतीत्या-दिवाक्यस्थाश्वश्वन्पदादिवत् कर्त्तृसदृशाचारबोधक-विवन्तं तत्पदं नामधातुकर्त्तृविहितक्विप्कृदन्तञ्च । तदितिपदस्य प्र-थमान्तत्वेऽपि पुंलिङ्गत्वेऽपि च विप्रतत्प्रयार्थांशे नियमतो गौण-भावेन स्वार्थबोधपरत्वेनातितदइत्यादेरिव प्रकृते तत्पदस्यापि न सर्व्वनामसंज्ञानिमित्तककार्य्यभागित्वं, अतः स त्वमसीति न प्रयुक्तम् । अगौणभावेन बुद्धिस्थधर्म्मावच्छिन्नादिनिष्ठविषयताशालि-बोधतात्पर्य्येण प्रयुक्तानां तदादीनामेव सर्व्वनामसंज्ञानिमित्त-ककार्य्यविधायकसूत्रविषयतायाः सर्व्वसम्मतत्वात् । अत्रागौण-

भावेन शाब्दविषयत्वं विभक्तिभिन्नार्थनिष्ठविशेष्यतानिरूपित-तादात्म्यातिरिक्तसम्बन्धावच्छिन्ना या विषयता तदभिन्नरूपम् ।

असोत्यत्र लट् विध्यर्थकः, तद्वाक्यार्थस्तु हे श्वेतकेतो, त्वं परमेश्वरायमाणो भवेः, अर्थात् परमेश्वराचारवत्तवाचारो भवेत् । अत्राचारः सर्व्वभूतेष्ववैषम्यज्ञानेन तेषां हितप्रयत्नः, परमेश्वरे ईदृशाचारः शास्त्रतोऽवगम्यते, तद्यथा—नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ऐतदात्म्यमिदं सर्व्वं तत्त्वमसि श्वेतकेतो इतिवाक्यद्वयभावार्थस्तु, जगत्कर्त्तृत्वेन परमेश्वरविषयकश्रवणमननपुनःपुनःस्मरणरूपोपासनात्मककारणबलेन पुत्रकलत्रशत्रुत्वज्ञानरूपविषमबुद्धिविरोधिनीं तेषु समबुद्धिं लब्ध्वा तवाविशेषेण सर्व्वभूतहितप्रयत्नो भवेत्, जीवतां सर्व्वभूतहितकरणमेव परमं श्रेय इति सर्व्व एव साधवो गायन्ति । दर्शितप्रकारेण भगवज्ज्ञानरूपोपासनात्मकयोगजनितसर्व्वज्ञतासम्पच्छालिनः श्वेतकेतुपितुः स्वपुत्रे निजाचारप्रवर्त्तनैव समुचिता, एवं रीतेश्चिरप्रचलितत्वात् । पुत्रस्यापि पित्राचरितक्रियाचरणमेव शास्त्रीयं, शास्त्रं यथा--पितरो येन याताः स्म येन याताः पितामहा इत्यादि । एवंविधप्रचलितरीतिं पश्यतां तत्त्वमसीतिवाक्यस्य सर्व्वविषयकप्रत्येकतत्त्वज्ञानोपदेशपरतया व्याख्यानं नहि जनयति सन्देहलेशमपि हृदयस्य ।

एष एवोपदेशो भगवता श्रीकृष्णेनापि कृतः । तद् यथा--ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम् । भक्त्या मामभिजानातीत्यन्तवाक्यम् । तत्र ब्रह्मभूतइत्यत्र भूतपदं सदृशबोधकं भूतेष्वितयत्र भूतपदन्तु प्राणिवाचकम् । अत्र युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिष्वित्यमरः ।

गीताभावार्थस्तु--ब्रह्मतुल्यः सन् मत्प्रसादान्मयि परमभक्तिं लभमानः साकारत्वजगत्कर्तृत्वादिरूपमदीयपारमार्थिकतत्त्वेन मामभिजानाति अर्थात् साक्षात्करोति। अस्य समानार्थका एव योगिनस्तं प्रपश्यन्ति भगवन्तमधोक्षजमित्यादिवाक्यनिकरः। न शोचतीत्यादिसर्व्वभूतेष्वित्यन्तं सादृश्यविवरणपरम्। इदानीमवधारयामो वयमद्वैतवादिभिः ब्रह्मभूतइत्यादिभगवत्प्रणीतवाक्यं न श्रुतं श्रुतञ्चेत्तदर्थावधारणलेशोऽपि न तेषामजनिष्ट। अत्र सदृशवाचिभूतशब्दप्रयोगमहिम्ना जीवेषु ब्रह्मभेदसिद्धिरप्रत्यूहैव। न चोपाध्यवच्छिन्ने तस्मिन् तदभेदस्वीकारे का क्षतिरिति वाच्यम्, तथा सति श्रुतिर्न गगनमित्यादिव्यवहारस्यापि प्रामाण्यापत्तेः॥ अतएव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं भवतीतिछान्दोग्योपनिषदीयोपक्रान्तानामुपसंहारार्थं प्रयुक्तस्य तत्त्वमसीतिवाक्यस्य सुष्ठूपपत्तिः। तद्वाक्यस्य कैवल्यपरत्वे ब्रह्माभेदभावनापरत्वे वा प्रातिस्विकरूपैः सकलपदार्थज्ञानाबोधकत्वेन तद्वाक्यत उपक्रान्तानामुपसंहारो न स्यात्। ऐतदात्म्यमिदं सर्व्वमित्यंशस्थितमेतदात्म्यपदं सहितपदलोपिकर्म्मधारयसमास यत्प्रत्ययसिद्धं, सहितपदलोपकर्म्मधारयसमासः शब्दशक्तिप्रकाशिकायां जगदीशेन स्वहस्तितः। तद्वाक्यार्थस्तु परमाणुचयं सहकारिणं कृत्वा जगदुत्पादकृतिमान्। एतत्पदात्मपदयोः प्रत्येकपदसार्थक्यायोक्तरीत्या कर्म्मधारयत्वमादृतम्। अन्यथा तयोरेकपदप्रयोगेनैव चरितार्थत्वसम्भवेन तद्द्वयप्रयोगो वैफल्यमापद्येत,एतच्छब्दस्य परमाणुबोधकतैव युक्ता, स यएषोऽणिमेतास्याव्यवहितपूर्व्वपठितत्वात्। अथ योगिनां सर्व्वविषयकज्ञानोत्पादे जगत्कर्तृत्वेन भगवच्छ्रवणमननादिकमेवोपयो-

गितया प्राप्तम्, एवं च परमाणुषु भूतजनकत्वं कथं प्रदर्शितमिति चेन्न कर्तृत्वस्वरूपकारणत्वस्य अचेतनरूपकारणाधिष्ठातृत्वनियम्यत्वेन अचेतनपरमाणुषु भूतजनकत्वप्रदर्शनस्यावश्यकत्वात् । एतावता परमाणव उपादानकारणानि परमेश्वरस्तु कर्तृविधयैव । उपादानकारणन्तु, प्रकृतित्वेन गीयते तत्कार्य्यस्य तु तद्विकार्य्यत्वेनेति व्यवहारविदां व्यवस्था । शाब्दिकानां कारिकापि, प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि । वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नतु । तन्निर्वर्त्त्यं विकार्य्यञ्चेत्यादिकम् । उदाहरणानि काशाः कटः क्रियन्ते, तण्डुलानि ओदनं पच्यन्ते इत्यादिकानि । परमाणुषूपादानविधया जनकत्वं, ब्रह्मणि तु कर्तृविधया कारणत्वनियामकमुपादानप्रत्यक्षवत्त्वं गीतावाक्येन सुस्पष्टमेव प्रत्यायितं, तद्यथा--मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति । अध्यक्षेण उपादानीभूतपरमाणुप्रत्यक्षाश्रयेण । ब्रह्मण्येव भूतजननोपयोगिसृष्टिकर्तृत्वउपादानप्रत्यक्षवत्त्वञ्चोपनिषदन्तरमपि प्रमापयति, तद्यथा--तदैक्षत बहुस्यां प्रजायेयेत्यादि । प्रकृतिः सूयते स चराचरमित्यनेन प्रकृतौ भूतोपादानकजनकत्वस्य भूमिरापोऽनलो वायु, एतद्योनीनि भूतानीत्यनेनतु भूम्यादिचतुर्विधपरमाणुषु भूतजनकत्वस्यप्रतिपादनेन परमाणुष्वेव मूलप्रकृतित्वं सूचितम् । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपा इतिवाक्यस्थितमजापदमपि सुतरां परमाणुश्रेणीतात्पर्य्यकमेव अतएव पृथिव्यादिद्रव्य एव रूपवत्त्वमिति सर्व्वजनव्यवहारोऽपि सुष्ठु सङ्गच्छते । तदाक्यस्यैकामित्यत्र काशब्दस्य ब्राह्मणाद्देव गावश्च कुलमेकं द्विधाकृत मितिवाक्यस्यैकपदस्येव एकजातीयोऽर्थः साजात्यञ्च-नित्याणुत्वरूपेण द्व्यणुककर्तृत्वेन वा । धर्म्मिणां नानात्वेऽप्यनु-

गतधर्म्मघटितानां तेषामेकपदेनाभिलापो न नियमप्रयोजकः । अतएव सामानाधिकरण्यरूपायाः व्याप्तेः प्रत्याश्रयं विभिन्नत्वेऽपि व्याप्तिघटकीभूतधूमत्ववह्नित्वादेरैक्यमादाय वह्निधूमयोरेका व्याप्तिः सर्व्वधूमसाधारणीति मूलकारोक्तिर्दीधितिकारेणोपपादिता । अथवा एकां प्रधानां नित्यत्वभुतजनकत्वरूपधर्म्मद्वयेन भगवत्सादश्चादपरनश्वरजनकापेक्षया परमाणूनां प्राधान्यात् । एतेन साङ्ख्यमतमपि निराकृतम् । प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते इतिवचनतात्पर्य्यविषयोऽर्थः स्थानान्तरे प्रदर्शितः । ब्रह्मणो बोधस्वरूपतापि निराकृता दर्शितप्रमाणनिकरप्रतिपादितायाः कृतिप्रत्यक्षरूपगुणवत्ताया बोधरूपगुणात्मके परमतसिद्धे ब्रह्मण्यसम्भवात् यतो गुणे गुणाश्रयत्वमद्वैतवादिभिन्नः कोऽपि व्यवहारदर्शी न स्वीकरोति । अथ शुद्धबोधे प्रत्यक्षादिमत्ताया असम्भवेऽपि अविद्यावच्छिन्नतयेश्वरसंज्ञके तस्मिन्नविद्यावच्छिन्ने गुणवत्त्वं स्वीक्रियते इति तु वलमात्रं, यत एतावतापि किं गुणे गुणवत्त्वं नायातं, न च शुद्धब्रह्मणः आनन्दबोधरूपगुणस्वरूपत्वेऽपि ईश्वरत्वव्यवहारोपयोग्यविद्याविशेषावच्छिन्ने तस्मिन् घटपटादिष्विव व्यवहारिकद्रव्यत्वमेवास्तु इति वाच्यं, यतः किञ्चिदवच्छेदेन यस्मिन् यस्य सत्त्वं शुद्धविशेष्येऽपि तत्र तस्य सत्त्वमिति नियमः सर्व्वदूरदर्शिसम्मतः । यथाग्रावच्छिन्नवृक्षः कपिसंयोगवान् मूलावच्छिन्नः स तदभाववानितिप्रतीत्युपजीविका वृक्षः कपिसंयोगतदभाववानिति प्रतीतिः, एकस्य कर्णे शब्दविशेषस्यापरव्यक्तिकर्णे तदभावस्य प्रत्ययदशायां शुद्धगगणं शब्दविशेषतदभाववदितिप्रतीतिश्च सर्व्वानुभवसिद्धा एवं स्थिते ईश्वरो वेत्ति जीवो

दुःखीत्यादिव्यवहारस्येव बोधो जानाति आनन्दो दुःखीत्यादिव्यवहारस्य वारयितुं गीर्व्वाणगुरोरप्यशक्यत्वापत्तेः । तव नवव्यवस्थया व्यवहारो न सेद्धुमर्हति । अविद्यामायानामकाद्यसंख्यपदार्थान्तरसिद्धौ विशुद्धानुमानस्य सुस्पष्टप्रमाणवाक्यस्य चैकस्याप्यभावाच्च ।

प्रकृतमनुसरामः—छान्दोग्योपनिषत्स्थितं यथैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यम् । अस्य भावार्थः येनाश्रुतं श्रुतं भवतीत्यादिवाक्येन एकेन बहुज्ञानं भवेदिति प्रतिपादितम् । एकेन बहुज्ञानमसम्भवदुक्तिकं तद्वाक्यश्रोतुरितिशङ्कानिवृत्तये यथैकेनेत्यादि-सर्व्वं मृन्मयं विज्ञातं स्यादित्यन्तवाक्यमेव प्रयुक्तं तद्दृष्टान्तेनैवोक्तशङ्काया निवृत्तिसम्भवात् । वाचारम्भणमित्यादिकन्तु मृन्मयपात्रस्य धर्म्मनिर्द्देशकं न तु दार्ष्टान्ते तत्सिद्धिप्रयोजनकम् । न हि दृष्टान्तवाक्यतो यद्यदर्थोऽवगम्यते तत्सर्व्व एव दार्ष्टान्ते सेत्स्यन्तीति नियमः । तथासति यथा भीमस्थूलगदा संघातयति वैरिणम् । दुर्य्योधनसहायस्य कर्णस्य सायकस्तथा ॥ इतिवाक्यतः कर्णशरेऽपि स्थूलत्वसिद्धिः स्यात्, स्याच्च पाण्डुपुत्रो यथा भीमो भीमः कर्णस्तथाहवे । तयोः परस्परं युद्धे न जाने किं भविष्यति ॥ इतिवाक्यतः कर्णेऽपि पाण्डुपुत्रत्वसिद्धिः । अतएव "प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वे विरोधाभावात् ... यदेकस्य देशभेदावच्छिन्न" मित्यादिदीधितिकारलिखनमपि सङ्गच्छते, तत्र दृष्टान्ते देशभेदावच्छिन्नत्वस्य प्राप्तावपि दार्ष्टान्ते न तत्सिद्धिः । अथ मा भवतु दृष्टान्तगतसकलधर्म्माणां सति बाधनिश्चये दार्ष्टान्ते सिद्धिः, अतएव

ग

सुखमतिसुन्दरं यथा सुन्दरं शतपत्रं शतपत्रन्तु पङ्के जायते यामिन्यां म्लानिं भजते चेत्यादिस्थले दृष्टान्तवाक्यबोधितपङ्कजातत्वादिबाधेन सौन्दर्य्यमात्रं सुखे सिध्यति । प्रकृते तु भूतेषु ब्रह्मारब्धत्वविकारत्वयोर्बाधनिश्चयासत्वे न तेषु तयोरपि सिद्धिरुचिता । दृष्टान्तगतधर्म्माणां दार्ष्टान्ते सिद्धिसम्भवे स्वरूपोपवर्णनस्यायुक्तत्वादिति चेन्न छान्दोग्योपनिषदीयवाक्यान्तरेण परमेश्वरारब्धत्वविकारत्वयोर्निराकृतत्वात् । तद् यथा--" स य एषोऽणिमा, ऐतदात्म्यमिदं सर्व्वमित्यादि । भगवद्गीतयापि तथैव प्रतिपादितम्, गीता यथा--भूमिरापोऽनलोवायुरिति, एतद्योनीनि भूतानीति, मयाध्यक्षेण प्रकृतिः सूयते सचराचरमित्यादीनि च । एतद्वाक्यतात्पर्य्यविषयोऽर्थो मत्कृताद्दैतवादखण्डने मत्पुत्रकृतकाशीवासपुस्तके च विशदरूपेण प्रदर्शितः । भूतेषु ब्रह्मारब्धत्वव्याघातकतर्कोऽपि व्याससूत्राभ्यां प्रतिपादितः । सर्वं खल्विदं ब्रह्मेत्यादिवाक्यस्य प्रकृततात्पर्य्यमवधारयितुमक्षमाणां स्तुतिवादाद्यात्मकवाक्यमात्रं श्रुत्वा भूतेषु ब्रह्मस्वरूपतामवधारितवतां भ्रमनिराकरणार्थं भूतेषु परमात्मारब्धत्वं सुस्पष्टतया प्रतिपादितम् । एतेन भूतेषु ब्रह्मस्वरूपताभावना हि न योगस्तात्त्विकभावनाया एव योगपदार्थत्वादिति सूचितम् । एवं च परमात्मारब्धत्वबोधकवाक्यप्रयोगानर्थक्यशङ्कापि निरस्ता । बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः॥ इति वाक्यस्थसर्व्वपदं सर्व्वजनकलाक्षणिकम् । तद्वचनपर्य्यवसितार्थस्तु देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥ इति भगवदुपदेशानुसारेणामरवृन्दस्य ध्यानपूजनादिरूपोपासनामाचरन् बहुजन्मानि यापयित्वा कस्मिंश्चिज्जन्म-

नि निदिध्यासनान्तज्ञानयोगमाचरन् मत्कृपया मां प्रतिपद्यते ।
अर्थादप्राकृततेजोमयमूर्त्तिकत्वसर्व्वकर्त्तृत्वसर्व्वज्ञत्वनिरुपाधिदया-
वत्त्वविश्वव्यापकत्वरूपमद्गतपारमार्थिकसकलधर्म्मप्रकारेण मां
मानसं साक्षात् करोति । सर्व्वजनकलाक्षणिकसर्व्वपदघटितो
वासुदेवः सर्व्वमित्यंशो निदिध्यासनाकारप्रदर्शनपरः । साकार-
त्वसर्व्वकर्त्तृत्वादिरूपधर्म्मेण भगवज्ज्ञानरूपोपासना तदधीन-
कैवल्यञ्चेति उपनिषद्वाक्यान्तरेणापि सुस्पष्टं प्रतिपादितम् । तद्
यथा--यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पापपुण्ये विधूय निरञ्जनः परमं साम्यमुपैतीति
सर्व्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीतेति च । द्वितीय-
वाक्यभावार्थस्तु यतो ब्रह्म सर्व्वजनकमतस्तादृशजनकत्वेन तदु-
पासीत तात्त्विकभावनाया एव दर्शिततत्त्वनिकरेण परमेश्वर-
साक्षात्कारं सम्पाद्य मुक्तिप्रयोजकत्वात् । जनके लक्षणा तु औत्स-
र्गिकी, आयुर्घृतं पिता स्वर्गः पिता धर्म्म इत्यादिभूरिप्रयोगस-
त्त्वात् । सादृश्यसाधर्म्म्यसाम्यपदादीनामेकार्थकत्वेन दर्शितवाक्य-
स्थसाम्यपदं ब्रह्मभिन्नत्वे सति ब्रह्मगतासाधारणधर्म्मबोधकम् । सा-
म्ये परमविशेषणमहिम्ना ब्रह्मणि यथा तात्त्विकदुःखराहित्यं ब्रह्म
भिन्नेषु तथात्यन्तिकदुःखनिवृत्तिर्भवत् । एवमेव स्पष्टमाह भगवद्-
गीतापि--इदं ज्ञानमुपाश्रित्य मम साधर्म्म्यमागताः । सर्गेऽपि नोप-
जायन्ते प्रलये न व्यथन्ति ते ॥ इति । एतेन जीवेषु ब्रह्मस्वरूप-
तावादो निरस्तः । एतदेव सुस्पष्टमभिहितं परमवाक्यान्तरेण,
तद्वाक्यं यथा—योगिनस्तं प्रपश्यन्ति भगवन्तमधोक्षजम् । ईदृ-
शसाक्षात्कारात्मकपरमयोगी निष्पन्ने तद्देहान्ते निःश्रेयसं ल-
भते; तावद्धर्म्मप्रकारेण भगवद्दर्शनमेव मुक्तावासन्नोपाय इतिप्रकर्ष-

बोधक'प्र'शब्देनसूचितम् । एतदेवाह वाक्यान्तरनिकरोऽपि, यथा—निदिध्यासितव्यः पश्चात् साक्षात्कर्त्तव्यः एतावतारे खल्वमृतमिति तमेव विदित्वातिमृत्युमेतीति च ।

मृत्तिकेत्येव सत्यमित्यंशस्तु दार्ष्टान्तिगतसत्यत्वसाधक एव । न च स्वारम्भस्वविकार्य्यकार्य्यजनकत्वस्यैव सत्यपदव्यवहारविषयतया ब्रह्मणोऽपि सत्यव्यवहारविषयतया चाकामेनापि भूतेषु ब्रह्मारम्भत्वं तद्विकार्य्यत्वं च स्वीकार्य्यम्; सुतरां ब्रह्माभिन्नत्वमायातमिति वाच्यं यतः सत्यत्वं न खलु नित्यत्वम्, तथा सति मृत्पिण्डादौ सत्यत्वस्यासत्त्वेन स्वायोगव्यवच्छेदपरैवकारघटितमृत्तिकेत्येव सत्यमितिवाक्यस्य बाधितार्थकत्वं स्यात् । तस्माद् व्यापारविशेषमन्तराकृत्य बहुप्रयोजनप्रयोजकत्वावच्छिन्ने सत्यपदस्य शक्तिर्निरूढ़लक्षणा वा स्वीकार्य्या । प्रकृते च एकं मृत्पिण्डं स्वविषयकज्ञानवतां पुंसां स्नानपानभोजनादिप्रवृत्त्युपयोगिनिखिलमृत्पात्रज्ञानेषूपयुज्यते, तथैको भगवानपि स्वविषयकज्ञानद्वारा योगिनां विश्वविषयकज्ञानरूपप्रयोजनेषु इति दृष्टान्तदार्ष्टान्तयोर्द्वयोरेव सत्यत्वमप्युपपन्नम् । आरम्भकवस्तूनामेव सत्यपदप्रतिपाद्यत्वे सत्यवागयं पुरुषः रामनाम सत्यमित्यादेरगतिः स्यात् । अस्मन्मते च सत्यवाक्यस्य रामनामादेश्च स्वोच्चारणद्वारा बहूनामिष्टानां प्रयोजकतया भवति तत्तद्वाक्यमप्यबाधितार्थकमेव । अतएव ब्रह्मैव सत्यं जगन्मिथ्येत्यद्वैतवादिप्रलापः प्रलाप एव । ब्रह्मण एव सत्यत्वे मृत्तिकेत्येव सत्यमित्यादिवाक्यमुन्मत्तप्रलपितं स्यात् । भूतेषु ब्रह्मारम्भत्वबाधकतर्कद्वयबोधकब्रह्मसूत्रमपि, तद् यथा--कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति, अस्य व्याख्यानं मत्कृताद्वैतवादखण्डने मत्पुत्रहरकुमारशास्त्रिप्रणीत-

काशीवासग्रन्थे च द्रष्टव्यम् ॥ निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्तीति कस्यचिद्वागाड़म्बरमात्रेण धन्धिता अन्धिताश्च सन्तस्तर्काणां निश्चायकता नास्तीति बहवः प्रलपन्ति । परन्तु ब्रह्मसूत्रमयस्वर्णसूत्रग्रथितमहर्षिरत्नाकरप्रसूतमहावाक्यमयमहामणिसमुज्ज्वलतेजःसेवया ध्वस्तान्तर्ध्वान्तानां वागाड़म्बरकाचतेजः किमुपकर्त्तुं प्रभवेत् । ब्रह्मसूत्रं दर्शितम्, ऋषिवाक्यानि यथा, यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः । मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम् ॥ इति । दुर्लभं परमं स्थानं तर्केणानुव्यवस्यति । इत्यादिकानि च ॥ अथैवं तर्काप्रतिष्ठानादितिब्रह्मसूत्रस्य का गतिः । सूत्रभावार्थस्तु वादिप्रतिवाद्युद्भावितकर्काणां परिशेषस्य कर्त्तुमशक्यत्वेनाप्रतिष्ठानादर्थादनवस्थादोषग्रस्तत्वादिति चेन्न यतो भवत्कल्पितार्थतात्पर्य्येण सूत्रं न प्रणीतम्, तथा सति व्यासेनैव प्रदर्शिततर्कसूत्रद्वयमुन्मत्तप्रलपितं स्यात् । तस्मादवधारयत, सांख्यमतस्याद्वैतमतस्य च दूषणार्थं तर्काप्रतिष्ठानादिति सूत्रं प्रणीतम् । तत्सूत्रार्थस्तु जगत्कर्त्तृतया प्रकृतिरूपपदार्थान्तरस्य ब्रह्मणि तूपादानविधया कारणत्वस्य साधकानुमाने तर्काप्रतिष्ठानादर्थात्तर्कस्यासत्त्वात् । अतएव ब्रह्मणि भूतोपादानताखण्डनार्थमग्रे व्यासप्रदर्शिततर्कसूत्रद्वयं सुष्ठु सङ्गतम् ॥

योगजोपायेन दर्शितप्रकारैर्भगवत्साक्षात्कार इव वेदज्ञादिश्वपचपर्य्यन्तानां सर्व्वेषामेव वाराणसीमरणं कैवल्यस्य साक्षात्कारणमिति सकलदूरदर्शिशिष्टसम्मतं बहुप्रमाणवाक्यप्रतिपादितञ्च। तत्र च प्रमाणानि प्रायशः सकलाभिज्ञपरम्परापरिज्ञाततयात्र न दर्शितानि । अथ काशीमरणं न साक्षात् कैवल्यकारणं परन्तु भग-

वन्महारुद्रेण मुमूर्षुदक्षिणकर्णे तारकमन्त्रोपदेशानन्तरं स च देहान्तरं परिगृह्णन् योगी भूत्वा परमेश्वरतत्त्वज्ञानभाक् तत्-कलेवरान्ते कैवल्यं लभते । एवंरीत्यैव काशीमरणं परम्परया मोक्षोपायो भवेदित्येव शास्त्रमीमांसा । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यादिश्रुत्या तत्त्वज्ञान एव मोक्ष-साक्षात्कारणतायाः प्रतिपादितत्वात् । अन्यथा तद्वाक्यस्थित-स्यैवकारस्य नान्यः पन्था विद्यतेऽयनायेत्यंशस्य चासङ्गतत्वाप-त्तेः । अतएव ज्ञानञ्च शङ्करादिच्छेदित्यादिमहावाक्यमपि । एतदेव सुस्पष्टमभिहितं कालिकापुराणे ५१तमाध्यायीया कापो-तोक्तिः, यथा--दिव्यं ज्ञानं ददात्येष तत्र यो म्रियते जनः । तस्मै स्वयं महादेवः संसारग्रन्थिमुक्तये । स भूत्वा परमो योगी मृतस्तत्र भवान्तरे । सुलभेनैव निर्व्वाणमाप्नोति हरसम्मतम् ॥ इति चेन्न वाराणसीमृतानां योनिजदेहान्तरधारणं विनैव मरणोत्तरकाले जीवानां कैवल्यकामनया निरुपाधिनिखिलजीवकल्याणकर्त्तुर्भ-गवद्विष्णोर्वाराणस्यां तपश्चरणात् पूर्व्वं दर्शितकालिकापुराणनि-र्द्दिष्टसमये मुक्तिभागित्वस्यैव शास्त्रीयत्वात् । विष्णोर्वरग्रहणसम-यात् परं वाराणसीमरणोत्तरमेव निःश्रेयसाधिगम इत्येव शास्त्रो-यमीमांसा । मरणोत्तरमुक्तौ शास्त्रं यथा—विनात्मघातमीशान त्यक्त्वा प्रायोपवेशनम् । निःश्रेयस्याः श्रियो हेतुस्तदस्तु जगदीश्वर । पञ्चक्रोश्यां मृताः काश्यां सन्तु निर्व्वाणदीक्षिताः । इत्यादि वाक्यं भगवद्विष्णोः शरीरिणां मुक्तिरूपवरप्रार्थनाबोधकम् । कालिका-पुराणोक्तनिर्द्दिष्टसमय एव कैवल्यरूपवरस्य विनात्मघातमित्यादि-वचनविषयत्वे भगवत्तपश्चरणप्रवृत्तेः सकलजीवानां मुक्तिरूप-वरप्रार्थनायाश्चासम्भवापत्तेः । देहान्तरान्ते कैवल्याधिगमस्य पर-

म्परया प्रयोजकतायाः काशीमरणे वरप्रार्थनाप्राक्कालेऽपि सत्त्वात्। न हि सिद्धे वस्तुनि प्रार्थना सम्भवेत्। प्रार्थनाया इच्छाविशेषरूपत्वात्, इच्छां प्रति तु विषयसिद्धेः प्रतिबन्धकत्वाच्च। काशीमृतानां मुक्तावयं क्रमः, मृत्योः पूर्व्वतृतीयक्षणे तारकमन्त्रोपदेशः, मरणपूर्व्वक्षणे उक्तसकलधर्म्मप्रकारेण ब्रह्मसाक्षात्कारस्तदनन्तरं कैवल्यम्। अतएव तमेव विदित्वातिमृत्युमित्यादिवचनं ज्ञानं च शंकरादिच्छेदितिवचनं च सङ्कोचं विनैव सुष्ठु सङ्गतमिति॥

महाज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमम्। स विष्णुलोकमाप्नोति मोक्षं गङ्गाम्बुमज्जनात्॥ दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम्। रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥ दर्शनात् स्पर्शनान्मुक्तिः, एतानि दश पापानि प्रशमं यान्तु जाह्नवि। स्नातस्य मम ते देवीत्यादिवाक्यानां यथाश्रुतार्थकत्वे विषमशिष्टदोषो दुष्परिहरः। यतः सामान्यतो ज्यैष्ठपौर्णमास्यां मञ्चस्थमधुसूदनदर्शनस्य जन्मनिवृत्तिरूपमुक्तिः फलम्, अतिदुर्ल्लभमहाज्यैष्ठ्याख्यतत्तिथौ तद्दर्शनफलं विष्णुलोकप्राप्तिः। गङ्गादर्शनस्पर्शनफलं मुक्तिः, तिथिविशेषे स्नानफलं दशविधपापक्षय इत्यादिकं कथमपि न सम्भवति। न च सामान्यतो ज्यैष्ठपौर्णमास्यां प्रतिवर्षं मधुसूदनदर्शनस्यैव फलं मुक्तिः, महाज्यैष्ठ्यां सकृद्दर्शनमपि विष्णुलोकप्रापकमित्येव तत्तद्वचनतात्पर्य्यविषयः, अतो न विषमशिष्टभयमपि। एवंरीत्यैव सकलपौराणिकवाक्यानि समाधेयानीति वाच्यं तथा सत्येकमात्रप्रेतश्राद्धस्येव तत्तिथौ सकृत्पुरुषोत्तमसुखदर्शनादेः फलजनकत्वाभावप्रसङ्गात् शास्त्रासत्त्वात्। तस्मात् प्रायशः पौराणिकवाक्यानि साक्षाच्छ्रवणासत्त्वे यथासम्भवं

कर्म्मणां प्रशंसां निन्दां वा बोधयित्वा न्यायानुगतविधिं कल्पयन्ति। इत्येव सिद्धान्तः। अन्यथा वह्वसमञ्जसं स्यात्। मीमांसकोक्तिरपि यथा,—केवलं शास्त्रमाश्रित्य न कर्त्तव्योऽर्थनिर्णयः। युक्तिहीन-विचारे तु धर्म्महानिः प्रजायते॥ इति।

शिवलिङ्गप्रतिष्ठाता न पुनर्मानवो भवेदितिमहर्षिवाक्य-मपि न मुक्तिफलकविधिं कल्पयति। तथाकल्पने एकमात्रशि-वलिङ्गप्रतिष्ठाया मुक्तिजनकतया शास्त्रबोधितत्वे द्वित्रादितो-द्वादशाष्टोत्तरशतादितल्लिङ्गप्रतिष्ठानां शिष्टपरम्पराप्रचलितानां प्र-तिदिनमसकृत्प्रातःसन्ध्याद्याचरणस्येव निष्फलत्वापत्तिः, न ह्येकपुरुषस्य मुक्तिशतादिकं फलं भवितुमर्हति। एवञ्च तद्वाक्य-मपि शिवसन्तोषफलकविधिं कल्पयति। प्रतिष्ठाप्राचुर्य्यप्रयुक्तशि-वसन्तोषस्तु तस्मिन्नेव जन्मनि प्रतिष्ठायाः स्वल्पत्वे जन्मान्तरादौ शिवसन्तोषजन्यतत्वज्ञानं जायते, ज्ञानञ्च शङ्करादिच्छेदित्यादिवा-क्यसत्वात्। एवञ्चापरसकलदेवताप्रतिष्ठाया अवश्यकर्त्तव्यत्वं यत्प्रतिष्ठाजन्यशिवसन्तोषप्रयुक्तात् कदाचिदपि तत्वज्ञानात् पर-मप्रयोजनं कैवल्यं जायते। एवञ्च काशीमरणे मुक्तिकारणतायाः केवलपुराणवाक्यप्रतिपादितत्वेन तत्र तत्कारणतासन्देहो दुरप-ह्नव एव श्रुतिं विना केवलपौराणिकवाक्यतो निश्चलनिश्चयास-म्भवात्।—इति कश्चिच्छङ्कते, तन्न मनोज्ञं विज्ञानां काशीमरणे मोक्षोपायताबोधकमहर्षिवाक्यशतस्येव चिरपरम्परासकलशिष्ट-व्यवहारस्येव च श्रुतिसाम्राज्यस्य सत्वात्। श्रुतयो यथा,—

"अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेत् ।" इति जाबालोपनिषत् ।

कैवल्यमुक्तिरेकैव पारमार्थिकरूपिणी ।
दुराचाररतो वापि मन्नामभजनात् कपे ।
सालोक्यमुक्तिमाप्नोति न तु लोकान्तरादिकम् ॥
काश्यान्तु ब्रह्मणालेऽस्मिन् मृतो मत्तारमाप्नुयात् ।
पुनरावृत्तिरहितां मुक्तिं प्राप्नोति मानवः ॥
यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः ।
जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत् ॥
निर्धूताशेषपापौघो मत्सारूप्यं भजत्ययम् ।
सैव सालोक्यसारूप्यमुक्तिरित्यभिधीयते ॥

इति शुक्लयजुर्वेदीयोपनिषद्वाक्यम् ।

सनत्कुमारसंहितापि—

अनिलो मृगनाभिरेणुगन्धि
रधिकाशिप्रणवोपदेशकाले ।
हरते मरणश्रमं जनानां
हरवामार्द्धकुचोत्तरीयजन्मा ॥ इति

अज्ञानावरणासिपुण्यवरणास्यन्ता परा या पुरी
नित्यं यत्र विराजते सह सुरैः श्रीशङ्करः शङ्करी ।
यत्पार्श्वं स्पृशती च भाति सततं भूषेव भागीरथी
स्वान्त त्वं यदि शान्तिमिच्छसि तदा सेयं सदा सेव्यताम् ॥

माहात्म्यं तव काशिके जनिमृतित्रासस्य संनाशिके
गायन्ति स्मृतयः पुराणनिचयश्चासृष्टिशिष्टोक्तयः ।
अन्यत्तीर्थशतं पुरातनमपि श्रुत्या न तद्बोधितं
तस्मादीशकृतान्विते जननि ते क्रोड़े स्थितिः प्रार्थ्यते ॥

मुक्तेर्जन्मकुमारिका प्रजनिका मुक्तिप्रदा काशिका
युक्तं राजति तद्द्वयं मृतचयं काश्यां स्मरारिः स्वयम् ।
मोक्षे दीक्षयिता स्थिता गिरिसुता दीनान्नदानव्रता
किं लब्धुं विपदास्पदेऽपरपदे भ्रान्तं मनो भ्राम्यसि ॥

दुष्करतपोऽपेक्षयापि शिवभक्तानां काशीवास एव परमप्रयोजनसाधनमित्यप्याह पुराणवाक्यम्,—"यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना । ततोऽविमुक्तमासाद्य नान्यद् गच्छेत्तपोवनम् ॥ मोक्षं सुदुर्लभं ज्ञात्वा संसारञ्चातिभीषणम् । अश्मना चरणौ हत्वा कालमत्र प्रतीक्षयेत् ॥"

शिवभक्ता एव परमकारुणिकमहेश्वरान्मरणप्राक्काले तारकमन्त्रोपदेशं लब्ध्वा मुक्तिं लभेरन्, न तु तदभक्तमानवादयोऽपि । अत्र पुराणवाक्यम्,—निवसन्ति मम क्षेत्रे मम भक्तिं प्रकुर्व्वते ।

मम लिङ्गधरा ये च तानेवोपदिशाम्यहम् ॥ निवसन्ति मम क्षेत्रे मम भक्तिं न कुर्व्वते । मम लिङ्गधरा ये नो न तानुपदिशाम्यहम् ॥" परमैश्वर्य्यशालिना विष्णुनापि शिवः सेव्यः, किं पुनरपरदेवैर्मानवादिभिश्च । अत्र पुराणादिसर्व्वशास्त्रापेक्षया परमप्रमाणीभूतोपनिषत्सु वृहज्जावालोपनिषदि वासुदेवोक्तिः—"त्वत्पादयुगले शम्भो भक्तिरस्तु सदा मम । भस्मधारणसम्पन्नो मम भक्तो भविष्यति ॥" इति ।

विष्णोरर्च्चनमाचरत्यपि चिरं विद्विष्य विश्वेश्वरं
यो द्विष्टापि च दुष्टचेतनदुराचारो जगन्मातरम् ।
शस्त्राघातशतं विधाय दहनैर्दग्ध्वा पुनश्चन्दनै
रालेपादिकतुल्यमस्य किमु तन्नावैधमाराधनम् ॥

——o——

॥ सम्पूर्णम् ॥

विज्ञापनम् ।

		मूल्यम्
१ ।	अद्वैतवादखण्डनम् दीधितिकृन्न्यूनतावादसहितम् [ग्रन्थकर्त्तुः सप्रतिमूर्त्तिसङ्क्षिप्तजीवनचरितोपेतम्]	२)
२ ।	शक्तिवादरहस्यप्रकाशः	।)
३ ।	कवितावली	।)
४ ।	विविधविचारः (ग्रन्थकर्त्तुः प्रतिमूर्त्तिसहितः)	१)
५ ।	तत्त्वसारः तथा रसरत्नम्	॥)
६ ।	जीवतत्त्वनिरूपणम्	॥)
७ ।	अद्वैतवादखण्डनपरिशिष्टम्	।≠)

महामहोपाध्याय-श्रीयुक्तराखालदासन्यायरत्न-महाशयेन प्रणीतानि पुस्तकान्येतानि निम्नलिखितस्थाने लभ्यन्ते ।

श्रीहरिहर-भट्टाचार्य्यः

१८५ सोनारपुरा,

बनारस सिटि ।

ई० आ० पि०